## सनि ग्रहगुहोश्च । (१२/२६१०)

ग्रह गुह इत्येतयोः उगन्तानां च सनि प्रत्यये परतः इडागमो न भवति । [1]जिघृक्षति । जुघुक्षति । उगन्तानां च – [2]रुरूषति । लुलूषति । 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपि सनाम्' (७.२.४९/२६१८) इति [3]विकल्पविधानात् श्रयतिरत्र नानुकृष्यते । [4]ग्रहेर्नित्यं प्राप्तः । गुहेः ऊदित्वाद् विकल्पः (७.२.४४/२२७९) ॥

## कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । (१३/२२९३)

कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येतेषां[5] लिटि प्रत्यये इडागमो न भवति । कृ – चकृव, चकृम । सृ – ससृव, ससृम । भृ – बभृव, बभृम । वृञ् – ववृव, ववृम । [6]वृङ – ववृवहे, ववृमहे । स्तु – तुष्टुव, तुष्टुम । द्रु – दुद्रुव, दुद्रुम । स्रु – सुस्रुव, सुस्रुम । श्रु – शुश्रुव, शुश्रुम ।

'सिद्धे सत्यारम्भो नियमार्थः' (कात. प. ६२), क्रादय एव लिटि अनिटः, ततोऽन्ये सेटः[7] इति । बिभिदिव, बिभिदिम । लुलुविव, लुलुविम । अनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः,[8] वृञ्वृङोस्तु प्रत्ययाश्रयः, तदुभयस्या[9]प्ययं नियमः । वृञो हि थलि ववर्थ इति निपातनाद् व्यवस्था । स्तुद्रुस्रुश्रुवां तु 'ऋतो भारद्वाजस्य' (७.२.६३/२२९६) [10]इत्यस्मादपि नियमात् य इट् प्राप्नोति सोऽपि नेष्यते । तुष्टोथ । [11]दुद्रोथ । सुस्रोथ । शुश्रोथ ।

[८३२] कृञोऽसुट्कस्येति वक्तव्यम् । (म.भा. ३.२८६)

ससुट्कस्य इडागमो यथा स्यात् । सञ्चस्करिव, सञ्चस्करिम । 'ऋतो भारद्वाजस्य' (७.२.६३/२२९६) इत्येतदप्यसुट्कस्यैवेष्यते, सञ्चस्करिथ ॥

## श्वीदितो निष्ठायाम् । (१४/३०३९)

श्वयतेः [12]ईदितश्च निष्ठायामिडागमो न भवति । शूनः । शूनवान् । ईदितः – ओलजी (धा. पा. १२९१) – लग्नः । लग्नवान् । ओविजी (धा.पा. १२९०) – उद्विग्नः । उद्विग्नवान् । 'ओदितश्च' (८.२.४५/३०१९) इति निष्ठातकारस्य नकारः । दीपी (धा. पा. ११५१) – दीप्तः । दीप्तवान् । डीङस्त्वोदितां मध्ये पाठो ज्ञापको निष्ठायामनिट्त्वस्य । स हि नत्वार्थः, नत्वं च निष्ठातोऽनन्तरस्य विधीयते । उड्डीनः । उड्डीनवान् । निष्ठायाम् इत्यधिकारः 'आर्धधातुकस्येड्वलादेः' (७.२.३५/२१८४) इति यावत् ॥

---

1. ग्रहगुहोः इति पञ्चम्यर्थे षष्ठी इत्यधिकम् ह. 2. नुनूषति ब. 3. विकल्पेन ह. 4. ग्रहेः–विकल्पः नास्ति ब.क.ई. 5. अज्ञानाम् इत्यधिकम् क. 6. वृङ्वृञोः सामान्येन ग्रहणम् इत्यधिकम् क. 7. एव इत्यधिकम् क, लिटि इत्यधिकम् ब.ह. 8. सिद्धः इत्यधिकम् क. 9. अपि नास्ति क. 10. एतस्मादपि क. 11. एवम् इत्यधिकम् ब. 12. इदितां च क.